# संस्कृतवार्ता:

दिनाङ्क : 07/07/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ताः</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत् केनापि देशेन स्वार्थपूर्त्यर्थं खनिजानां, प्रौद्योगिकीनां, आपूर्ति-श्रृङ्खलानाञ्च शस्त्ररुपेण प्रयोगः न कर्त्तव्यः, सहैव तेन् ब्रिक्स-देशेभ्यः कृत्रिम-बुद्धिमत्तायाः उत्तरदायित्वपूर्ण-प्रयोगाय आह्वानं कृतम्।
- प्रधानमन्त्रिणा संयुक्त-राष्ट्र-सुरक्षा-परिषदा, विश्व-बैंकेन, अन्ताराष्ट्रिय-मुद्राकोषेण, विश्व-व्यापार-सङ्घटनेन च समाह्वानानि प्रतिबिम्बयितुं त्वरया परिष्कारार्थम् आह्वानं कृतम्।
- रक्षामन्त्रिणा राजनाथसिंहेन प्रोक्तं यत् सिन्दूराभियानावधौ भारतीय-उपकरणानां सामर्थ्येन स्वदेशी-रक्षोत्पादानां वैश्विकस्तरे आवश्यकता सम्वर्धिता ।
- ऋतु-विभागेन ओडिशा-छत्तीसगढ़-पूर्वी-मध्यप्रदेशेषु अतिवृष्टेः रेड-अलर्ट इति सञ्चेतना सहैव उत्तराखण्डाय ऑरेंज-अलर्ट इति सञ्चेतना प्रसारिता।
- विम्बल्डन-टेनिस-प्रतिस्पर्धायां युकी-भांबरी सहैव तस्य अमेरिकी-सहभागी रॉबर्ट-गैलोवे इत्येतौ अद्य सायं लन्दननगरे पुरुषयुगलक्रीडायाः तृतीयचक्रे कीडिष्यतः ।

-------------------------------------------

<u>प्रधानमन्त्री-ब्रिक्सशिखरसम्मेलने हस्तक्षेपः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत् केनापि देशेन स्वार्थपूर्त्यर्थं खनिजानां, प्रौद्योगिकीनां, आपूर्ति-श्रृङ्खलानाञ्च शस्त्ररुपेण प्रयोगः न कर्त्तव्यः।

तेनोदीरितं यत् महत्त्वपूर्णखनिजेषु प्रौद्योगिकीषु च सहयोगेन सह आपूर्ति-श्रृङ्खलानां सुरक्षार्थमपि अवधानं भवेत्। श्रीमोदिना प्रोक्तं यत् याचनाधारितनिर्णये दीर्घकालिक-वित्तीय-

स्थैर्ये सहैव डेवलपमेंट-बैंक-परियोजनासु स्वस्थसामर्थ्याङ्कस्य च रक्षणे ध्यानं केन्द्रितं स्यात्। प्रधानमन्त्रिणा प्रोक्तं यत् एकविंशतितमे शतके जनानां प्रगतिः कल्याणञ्च प्रौद्योगिक्यां विशेषतः से कृत्रिम-बुद्धिमत्तायाञ्च आश्रितमस्ति। प्रधानमन्त्रिणा ब्रिक्स-देशेभ्यः कृत्रिम-बुद्धिमत्तायाः उत्तरदायित्वपूर्ण-प्रयोगाय आह्वानं कृतम्।

---------------------------------------------

<u>प्रधानमन्त्री-ब्रिक्सशिखरसम्मेलनम्</u>

भारतेन प्रोक्तं यत् ब्रिक्सनेतृणां घोषणापत्रे वैश्विक-दक्षिणस्य अधिकांशचिन्ताः समावेशिताः सन्ति। रियो-डी-जेनेरियो इत्यत्र ब्रिक्स-शिखर- सम्मेलनस्य प्रथमदिनस्य समापनानन्तरं वार्ताहरान् सम्बोधयन् विदेशमन्त्रालये आर्थिक-सम्बन्ध-सचिवेन दम्मू-रवि इत्यमुना प्रोक्तं यत् प्रधानमन्त्रिणा मोदिना बहुपक्षीय-वैश्विक-सङ्घटनेषु परिष्कारस्य आवश्यकता दृढतया प्रकाशिता।

एकस्मिन् सत्रे हस्तक्षेपावधौ प्रधानमन्त्रिणा प्रोदीरितं यत् संयुक्त-राष्ट्र-सुरक्षा-परिषदा,, विश्व-बैंकेन, अन्ताराष्ट्रिय-मुद्राकोषेण, विश्व-व्यापार-सङ्घटनेन च समाह्वानानि प्रतिबिम्बयितुं त्वरया परिष्कारः कर्त्तव्यः। दम्मू-रवि इत्यनेन एतदपि प्रोक्तं यत् पहलगाम-आतङ्क्याक्रमणस्य समेभ्यः देशेभ्यः सर्वसम्मत्या कठोरशब्देषु निन्दापि शिखर-सम्मेलनस्य मुख्याकर्षणमासीत्

---------------------------------------------

<u>राजनाथ-रक्षार्थशास्त्रम्</u>

रक्षामन्त्रिणा राजनाथसिंहेन प्रोक्तं यत् सिन्दूराभियानावधौ प्रदर्शित भारतीय-उपकरणानां सामर्थ्येन स्वदेशी-रक्षोत्पादानां वैश्विकस्तरे आवश्यकता सम्वर्धिता । अद्य नवदिल्ल्यां नियन्त्रकानां सम्मेलने प्रवदता रक्षामन्त्रिणा एतत् प्रकाशितं यत् भारतस्य रक्षोद्योगेषु अपार-सम्भावनाः निहिताः । तेनोदीरितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भारतेन रक्षाक्षेत्रे

प्रायः आत्मनिर्भरता स्वायत्तीकृता । तेन कथितं यत् विदेशेभ्यः आयात्यमानानि अधिकांश-रक्षोपकरणानि इदानीं देशे एव निर्मीयन्ते।

रक्षामन्त्रिणा रक्षार्थशास्त्रोपरि बलं प्रदत्तम् , यत्र पुनः शस्त्रीकरणसम्बद्ध- निवेशः सजवं प्रवर्तमानः वर्तते । श्रीसिंहेन कथितं यत् अद्य अमेरिका-यूरोपीयदेशान् समेत्य सर्वेऽपि प्रमुखदेशाः रक्षाव्यये सजवगत्या समेधमानाः सन्ति।

--------------------------------------------

<u>बिहार-सर्वोच्चन्यायालयः</u>

सर्वोच्चन्यायालयेन अद्य बिहारराज्ये मतदाता-सूचीनां विशेष-गहन-पुनरीक्षणस्य सन्दर्भे निर्वाचनायोगस्य निर्णयस्य विरोधे प्राप्तयाचिकानां विचारविमर्शाय स्वीकृतिः प्रदत्ता। एतासां याचिकानां वादश्रवणं गुरुवासरे भविष्यति।

न्यायमूर्तिः सुधांशु-धूलिया सहैव न्यायमूर्तिः जॉयमाल्या-बाग्ची इत्यनयोः पीठेन वादश्रवणाय सहमतिः प्रकटिता। राज्ये विशेषगहनपुनरीक्षणस्य प्रकारः सहैव समयश्च इत्येतयोः सन्दर्भे निर्वाचनायोगस्य पदक्षेपमाश्रित्य सर्वोच्चन्यायालये विवादः समङ्कितः।

--------------------------------------------

<u>भारत-उपराष्ट्रपतिः</u>

भारतस्य उपराष्ट्रपतिना श्रीजगदीपधनखडेन लोकतन्त्रस्य त्रयाणां स्तम्भानाम् न्यायपालिका, विधायिका कार्यपालिका इत्येतेषां मध्ये साम्यस्थापनाय बलं प्रदत्तम् ।

सः अवदत् यत् प्रत्येकसंस्था स्वकीये क्षेत्रे सर्वोच्चं वर्तते। किन्तु यदा एका संस्था अन्यस्य क्षेत्रे अवैधं प्रवेशं करोति, तदा सः लोकतन्त्राय संभावितंसंकटं जनयितुं शक्नोति।

--------------------------------------------

<u>रेल-अश्विनीवैष्णवः</u>

रेलमन्त्रिणा अश्विनि-वैष्णवेन अद्य उद्घोषितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे रेलवे राष्ट्रविकासाय प्रतिबद्धो वर्तते। बिहारराज्यस्य समस्तीपुरनगरस्य कर्पूरीग्राम-रेलस्थानके एकस्यां सभायाम् श्रीवैष्णवः अवदत् यत् गतैकादशवर्षेषु त्रयस्त्रिंशत्सहस्रकिलोमीटमितादपि अधिकाः नवीन-रेलमार्गाः विस्तारिताः।

तथैव तेन सबलं प्रोक्तं यत् एनडीए-शासनकाले रेलवे-व्यवस्थायाम् उत्कृष्ट क्रान्तिः दृश्यते, सहैव अतीव-आधुनिकरेलयानानि नूतनप्रविधयश्चापि उपलभ्यमानानि सन्ति।

--------------------------------------------

<u>ट्रम्प-ब्रिक्सशुल्कः</u>

अमेरिकादेशस्य राष्ट्रपतिना डोणाल्ड् ट्रम्प्- इत्यनेन सञ्चेतितं यत् तस्य प्रशासनम् तेषां देशानामुपरि अतिरिक्त-दशप्रतिशतं टैरिफ-शुल्कं स्थापयिष्यति ये ब्रिक्स इत्यस्य अमेरिका-विरुद्ध-नितिभिः सह युक्ताः सन्ति।

एकस्मिन् सोशल-मीडियासन्देशे तेनोक्तं यत् एतस्यां नीत्यां कोऽपि विवादः नैव भविष्यति।

ट्रम्पस्य टिप्पणिः ब्रिक्स इत्यस्यानन्तरं समागता अस्मिन् ब्राज़ील-चीन-दक्षिण अफ्रीका-भारदेशानां कश्चन समूहः वर्तते येन अमेरिकाद्वारा संवर्धितस्य टैरिफशुल्कस्य निन्दा कृता।

ब्राज़ीलदेशे स्वीयोपवेशने समूहेन इरानोपरि अमेरिकायाः ईस्राईलदेशस्य च आक्रमणस्य निन्दनमपि कृतम्।

--------------------------------------------

<u>भारतीय-ऋतुविभागेन अद्य</u>

ऋतुविभागेन अद्य मध्यमहाराष्ट्रे विदर्भे च तीव्रादपि अतितीव्रतर-वृष्टेः अनुमानं प्रकटीकृतम्। ऋतुविभागेन अद्य गुजरात-राजस्थान- हरियाणा-कोंकण-गोवा-ओडिशा-तटीय कर्नाटक-उत्तरप्रदेशान् समेत्य उत्तर-पश्चिम-भारतस्य कतिचिद्भागेषु गर्जनस्य, तीव्रवातस्य,

विद्युद्योतनेन सह अतिवृष्टेः भविष्यवाणी कृता । आकाशवाण्या सह संवादक्रमे आईएमडी इत्यस्य वरिष्ठ-वैज्ञानिकेन आरके-जेनामणि इत्यमुना कथितं यत् ओडिशा-छत्तीसगढ़-पूर्वी-मध्यप्रदेशेभ्यश्च अतिवृष्टेः रेड-अलर्ट इति सञ्चेतना प्रसारिता अपरत्र उत्तराखण्डाय अद्य ऑरेंज-अलर्ट इति सञ्चेतना प्रसारिता। तेनोदीरितं यत् दिल्ली-एनसीआर इत्यत्र आगामिषु द्विदिवसेषु अल्पात् मध्यमवृष्टेः सम्भावनास्ति।

------------------------------------------

**विम्बल्डन-भांबरी**

विम्बल्डन-टेनिस-प्रतिस्पर्धायां युकी-भांबरी सहैव तस्य अमेरिकी-सहभागी रॉबर्ट-गैलोवे इत्येतौ अद्य सायं लन्दननगरे पुरुषयुगलक्रीडायाः तृतीयचक्रे क्रिडिष्यत: ।

इति वार्ता।